# श्रीमद् भागवत रसिक कुटुंब

## तुलसीस्तुतिः

**तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे ।**
**नमस्ते नारदनुते नारायणमनः(फ्)प्रिये ॥ 1॥**

**मनः(फ्) प्रसादजननि सुखसौभाग्यदायिनि ।**
**आधिव्याधिहरे देवि तुलसि त्वां(न्) नमाम्यहम् ॥ 2॥**

**यन्मूले सर्वतीर्थानि यन्मध्ये सर्वदेवताः ।**
**यदग्रे सर्व वेदाश्च तुलसि त्वां(न्) नमाम्यहम् ॥ 3॥**

**अमृतां(म्) सर्वकल्याणीं(म्) शोकसन्तापनाशिनीम् ।**
**आधिव्याधिहरीं(न्) नृणां(न्) तुलसि त्वां(न्) नमाम्यहम् ॥ 4॥**

**देवैस्त्वं(न्) निर्मिता पूर्वं(म्) अर्चितासि मुनीश्वरैः ।**
**नमो नमस्ते तुलसि पापं(म्) हर हरिप्रिये ॥ 5॥**

**सौभाग्यं(म्) सन्ततिं(न्) देवि धनं(न्) धान्यं(ञ्) च सर्वदा ।**
**आरोग्यं(म्) शोकशमनं(ङ्) कुरु मे माधवप्रिये ॥ 6॥**

तुलसी पातु मां(न्) नित्यं(म्) सर्वापद्भ्योऽपि सर्वदा ।
कीर्तिताऽपि स्मृता वाऽपि पवित्रयति मानवम् ॥ 7॥

या दृष्टा निखिलाघसङ्घशमनी स्पृष्टा वपुः(फ्)पावनी
रोगाणामभिवन्दिता निरसनी सिक्ताऽन्तकत्रासिनी ।
प्रत्यासत्तिविधायिनी भगवतः(ख्) कृष्णस्य सं(म्)रोपिता
न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ॥ 8॥

इति तुलसीस्तुतिः(स्) समाप्ता ।